# mohinI rachita stotra

# શ્રીકૃષ્ણસ્તોત્રં મોહિનીરચિતમ્

## Document Information

Text title : mohinI rachita stotra

File name : mohinikrishnastotra.itx

Category : vishhnu, krishna, stotra, vishnu

Location : doc_vishhnu

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com, Aruna Narayanan

Latest update : January 16, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીકૃષ્ણસ્તોત્રં મોહિનીરચિતમ્

શ્રી ગણેશાય નમઃ ।
મોહિન્યુવાચ ।
સર્વેન્દ્રિયાણાં પ્રવરં વિષ્ણોરંશં ચ માનસમ્ ।
તદેવ કર્મણાં બીજં તદુદ્ભવ નમોઽસ્તુ તે ॥ ૧॥

સ્વયમાત્મા હિ ભગવાન્ જ્ઞાનરૂપો મહેશ્વરઃ ।
નમો બ્રહ્મન્ જગત્સ્રષ્ટસ્તદુદ્ભવ નમોઽસ્તુ તે ॥ ૨॥

સર્વાજિત જગજ્જેતર્જીવજીવ મનોહર ।
રતિબીજ રતિસ્વામિન્ રતિપ્રિય નમોઽસ્તુ તે ॥ ૩॥

શશ્વદ્યોષિદધિષ્ઠાન યોષિત્પ્રાણાધિકપ્રિય ।
યોષિદ્વાહન યોષાસ્ત્ર યોષિદ્બન્ધો નમોઽસ્તુ તે ॥ ૪॥

પતિસાધ્યકરાશેષરૂપાધાર ગુણાશ્રય ।
સુગન્ધિવાતસચિવ મધુમિત્ર નમોઽસ્તુ તે ॥ ૫॥

શશ્વદ્યોનિકૃતાધાર સ્ત્રીસન્દર્શનવર્ધન ।
વિદગ્ધાનાં વિરહિણાં પ્રાણાન્તક નમોઽસ્તુ તે ॥ ૬॥

અકૃપા યેષુ તેઽનર્થં તેષાં જ્ઞાનં વિનાશનમ્ ।
અનૂહરૂપભક્તેષુ કૃપાસિન્ધો નમોઽસ્તુ તે ॥ ૭॥

તપસ્વિનાં ચ તપસાં વિઘ્નબીજાય લીલયા ।
મનઃ સકામં મુક્તાનાં કર્તું શક્તં નમોઽસ્તુ તે ॥ ૮॥

તપઃસાધ્યસ્તથાઽઽરાધ્યઃ સદૈવં પાઞ્ચભૌતિકઃ ।
પઞ્ચેન્દ્રિયકૃતાધાર પઞ્ચબાણ નમોઽસ્તુ તે ॥ ૯॥

મોહિનીત્યેવમુક્ત્વા તુ મનસા સા વિધેઃ પુરઃ ।
વિરરામ નમ્રવક્ત્રા બભૂવ ધ્યાનતત્પરા ॥ ૧૦॥

ઉક્તં માધ્યન્દિને કાન્તે સ્તોત્રમેતન્મનોહરમ્ ।
પુરા દુર્વાસસા દત્તં મોહિન્યૈ ગન્ધમાદને ॥ ૧૧॥

સ્તોત્રમેતન્મહાપુણ્યં કામી ભક્ત્યા યદા પઠેત્ ।
અભીષ્ટં લભતે નૂનં નિષ્કલઙ્કો ભવેદ્ ધ્રુવમ્ ॥ ૧૨॥

ચેષ્ટાં ન કુરુતે કામઃ કદાચિદપિ તં પ્રિયમ્ ।
ભવેદરોગી શ્રીયુક્તઃ કામદેવસમપ્રભઃ ।
વનિતાં લભતે સાધ્વીં પત્નીં ત્રૈલોક્યમોહિનીમ્ ॥ ૧૩॥

॥ ઇતિ શ્રીમોહિનીકૃતં કૃષ્ણસ્તોત્રં સમાપ્તમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

---

*mohinI rachita stotra*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*